## नुगतोऽनुनासिकान्तस्य । (८५/२६४३)

अनुनासिकान्तस्य अङ्गस्य योऽभ्यासः तस्य अकारान्तस्य नुगागमो भवति यङ्यङ्लुकोः परतः । तन्तन्यते । तन्तनीति । जङ्गम्यते । जङ्गमीति । यंयम्यते । यंयमीति । रंरम्यते । रंरमीति । नुक् इत्येतद् अनुस्वारोपलक्षणार्थं द्रष्टव्यम् । स्थानिना हि आदेशो लक्ष्यते । तेन यंयम्यते इत्येवमादौ अझल्परत्वेऽपि अनुस्वारो भवति ।

[८७९] पदान्तवच्चेति वक्तव्यम् । (म.भा. ३. ३५९)

'वा पदान्तस्य' (८.४. ५९/१२५) इति परसवर्णविकल्पो यथा स्यात् इति । अतः इति किम् ? तेतिम्यते । तपरकरणं [1]तु भूतपूर्वस्यापि दीर्घस्य निवृत्त्यर्थम्, [2]बाभाम्यते । अनुनासिकान्तस्य इति किम् ? पापच्यते ॥

## जपजभदहदशभञ्जपशां च । (८६/२६३८)

जप जभ दह दश भञ्ज पश इत्येतेषाम् अभ्यासस्य नुगागमो भवति [3]यङ्यङ्लुकोः परतः । जञ्जप्यते जञ्जपीति । जभ – जञ्जभ्यते । जञ्जभीति । दह – दन्दह्यते । दन्दहीति । दश – दन्दश्यते । दन्दशीति दश इति दंशिः अयं नकारलोपार्थमेव निर्दिष्टः । तेन यङ्लुक्यपि नकारलोपो भवति । भञ्ज – बम्भज्यते । बम्भञ्जीति । पश इति सौत्रो धातुः – पम्पश्यते । पम्पशीति ॥

## चरफलोश्च । (८७/२६३६)

चर फल इत्येतयोः अभ्यासस्य नुगागमो भवति [4]यङ्यङ्लुकोः परतः । चञ्चूर्यते । [5]चञ्चूरीति । [6]पम्फुल्यते । पम्फुलीति ॥

## उत्परस्यातः । (८८/२६३७)

चरफलोः अभ्यासात् परस्य अतः [7]उकारादेशो भवति [8]यङ्यङ्लुकोः परतः । चञ्चूर्यते । [9]चञ्चूरीति । [10]पम्फुल्यते । पम्फुलीति । परस्य इति किम् ? [11]अभ्यासस्य मा भूत् । अतः इति किम् ? अलोऽन्त्यस्य मा भूत् । उदिति तपरकरणं चञ्चूर्ति, पम्फुलीति इत्यत्र [12]लघूपधगुणनिवृत्त्यर्थम् । [13]दीर्घस्यासिद्धत्वात् इह लघुत्वं न निवर्तते ॥

---

1. तु नास्ति ब, किम् ह. 2. भाम क्रोधे इत्यधिकम् ह. 3. यङि यङ्लुकि च ब. ह. 4. यङि यङ्लुकि च इ. 5. चञ्चुरीति क. इ. ड. 6. नास्ति क. 7. नुकारादेशः क. 8. यङि यङ्लुकि च इ. ह. 9. चञ्चुरीति क. इ. ड. 10. नास्ति क. 11. अभ्यासस्य इति क. 12. लघूपधलक्षण° क. इ. 13. न तु दीर्घत्वम् गुणं निवर्तयति, गुणे कर्तव्ये दीर्घत्वमसिद्धम् । तेन न निवर्तयति इ. ह. दीर्घत्वं तु तपरकरणेन व्यावर्त्यते असिद्धत्वात ड.